श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीमद्वेदान्तदेशिक सुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमद्वेदान्तदेशिक सुप्रभातम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

रामानुजो गुरुवरस्तवरञ्जितात्मा
    रात्रिं दिवं मृदुवचांसि हृदि संस्मरन् ते।
जागर्ति देव त इमेऽनुगता न चिन्त्यं
    वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ १ ॥

दुर्वादिनस्सपदि लोकविमोहनाय
    जाग्रत्यकुण्ठगतयो विदिशासु दिक्षु।
तत्वावबोधनपटो कलमूलकादिन्
    वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ २ ॥

वेदान्तदेशिकपते विनिवेष्टुमीशः
    श्रीमानसौ प्रयतते वृषशैलनाथः।
स त्वां अहंयुजनगर्वविमोचनाय
    वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ ३ ॥

आबर्हणाय निगमान्तक जातमात्र
    ब्राह्मण्यवत् वृषललोक कथाविधानाम्।
आस्ते विपाकसमयस्समयावनाय
    वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ ४ ॥

स्वातन्त्र्यमीप्सति विभुस्त्वयि सर्वतन्त्रे-
    ष्वीशः कवेरतनयातट नित्यावासी।
तल्लोकमान्यपदमण्डन भाग्यशालिन्
    वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ ५ ॥

अम्भोज मध्यमपहाय हठात् रसज्ञां
    इच्छत्यधिष्ठितुमसौ तव वाजिवक्त्रः।
पश्चात् सिताम्बुज विकासविधेः स्वकान्त्या
    वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ ६ ॥

निर्वेष्टुमिच्छसि यथायथमाभिरूप्यं
    देवस्य हस्तिशिखरिण्यनपायभिन्नं।
सम्प्राप्त एष समयस्समुपासितुं तं
    वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ ७ ॥

कल्लोलमालिनि कठोरकरोऽप्युदेति
    श्रीमानसावुदित एव चकास्त्यनूरु।
ब्राह्मो मुहूर्त इह दैनिकपालनाय
    वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ ८ ॥

पारम्यमैश्वरममेयमुपेयूषी सा
    माता समस्तजगतां मधुवैरिपत्नी।
आशीर्भिराह्वयति पुत्रमनूनशक्तिं
    वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ ९ ॥

कातर्यमाप्य कलुषीकृत नैजभावा
    मोहान्धकारकुहरे मनुजा निमग्नाः।
कांक्षन्ति वक्त्र हरिताश्वमुदीक्षितैतुं
    वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ १० ॥

शुक्लोर्ध्वपुण्ड्रपरिचिह्नितफालभागाः
    कालोपमाः कलुषयन्ति जगन्ति पालाः।
उन्मूल्य दुर्विलसितान्युपकर्तुमेषां
    वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ ११ ॥

तत्त्वं विशिष्टमवबोधयितुं बुधानां
    आशासते द्रमिडमुख्यमहानुभावाः।

श्रीलक्ष्मणार्य समयावनलब्धजन्मन्
वेदान्तदेशिक ! कवीश्वर ! सुप्रभातम्॥ १२ ॥

द्वेधाविभक्त परिवैष्णव शास्त्रनिष्ठाः
स्वप्नाधिकारभुवि यद्विशयं भजन्ते।
ग्रन्थं प्रणीतुमथ सज्जनसंभवाख्यं
वेदान्तदेशिक गुरो ! तव सुप्रभातम्॥ १३ ॥

॥ इति श्रीमद्वेदान्तदेशिक सुप्रभातम् सम्पूर्णम् ॥